श्रीः
श्रीमते रामानुजाय नमः
श्रीमते निगमान्तमहादेशिकाय नमः
श्रीमहालक्ष्म्यै नमः

# श्रीमद्वेङ्कटाध्वरिविरचिते श्रीलक्ष्मीसहस्रे

# ॥ यत्नस्तबकः षष्ठः ॥

*This document has been prepared by*

*Sunder Kidāmbi*

*with the blessings of*

**श्री रङ्गरामानुज महादेशिकन्**

*His Holiness  śrīmad āṇḍavan śrīraṅgam*

श्रीः

श्रीमते रामानुजाय नमः

श्रीमते निगमान्तमहादेशिकाय नमः

श्रीमहालक्ष्म्यै नमः

# ॥ यत्नस्तबकः षष्ठः ॥

श्रीनिवासस्य महिषीं श्रेयसे तामुपास्महे।
यदर्थमेव विदधे यत्नं भूयांसमच्युतः ॥ **6.1** ॥

कमले कमलेक्षणस्त्वदर्थे
    कठिनं कर्म करोत्यसौ न किं वा।
कलशोदधिमन्थनप्रयासात्
    अपरं किं श्रमदायि कर्म लोके ॥ **6.2** ॥

तव गुरुस्तनशैलभरं सदा
    जननि वोढुमना जगतां पिता।
उरुभरोद्वहनाभ्यसनाय किं
    तमपि मन्दरमम्बुनिधौ दधौ ॥ **6.3** ॥

नादत्तमध्यवनि सिध्यति किञ्चनेति
    निश्चिन्वता भगवतापि विवित्सता त्वाम्।
वैदेहि कामपि शिलामबलां विधाय
    कन्याप्रदानविधिरक्षपदाय चक्रे ॥ **6.4** ॥

विद्यां बलां रघुपतिः पथि गाधिपुत्रात्
    सम्प्राप्य निह्नुतसमस्त तनुक्लमोऽपि।
अम्बातनुक्लम हरामबलामिह त्वां
    स्वस्य ध्रुवं घटयितुं तमुपास्त भूयः ॥ **6.5** ॥

शंसन्ति पङ्क्तिरथयागविधेः फलं यं
सोऽयं मघावनिभवां जनकात्मजे त्वाम्।
प्राप्तुं व्यधात् कुशिकनन्दनयज्ञरक्षां
रक्षांसि हन्त दमयन् युधि रामचन्द्रः॥ **6.6** ॥

भगवति क्षितिपुत्रि भवत्कृते
भवहरोऽपि भवन् रघुनन्दनः।
समभवद्भवचापलतान्तधीः
स इति विस्मयवन्त इहास्महे॥ **6.7** ॥

त्वद्भ्रूभटस्य धनुषा विजितः सुमेषो
रामस्तमेव नितरामभिराद्धुकामः।
तत्प्रीतये जनकनन्दिनि तद्विपक्ष -
कोदण्डभङ्गमुपहारमिवाजहार॥ **6.8** ॥

कर्तव्ये जनकेन मैथिलि तवोद्वाहक्रमालोचने
सोऽयं वागुपकारमारचयितेत्यालोच्य भाविस्थितिम्।
तद्वंशैकपुरोहितस्य हि शतानन्दस्य हर्षाय तन् -
मातुर्ग्रावदशां हरन् रघुपतिस्तस्योपकारं व्यधात्॥ **6.9** ॥

सुन्दस्त्रीतनुभूसुबाहु कुहनोपज्ञं तु यज्ञक्रिया -
प्रत्यूहं शमयन् प्रहृष्य घटकं शुश्रूषया कौशिकम्।
दुर्दर्शं शशिखण्डमण्डन महादोर्दण्डकोदण्डम -
प्युर्वीनन्दिनि खण्डयन्नुदवहत् त्वामम्ब रामः श्रमात्॥ **6.10** ॥

त्वां मार्गमाणस्त्वदुदन्तशंसिने
वृद्धाय गृध्राय रमे रघूद्वहः।
योग्येकयोग्यानि पदान्यदादहो
सन्तोऽपि वेलामतियन्ति रागतः॥ **6.11** ॥

अपि सकलशरण्यो मानिनामग्रगण्यो
भगवति भवदर्थे भानुवंशाधिनाथः।
कपिमपि शरणोत्कः कञ्चिदानञ्च कष्टं
गणयति न फलार्थी गौरवं लाघवं वा॥ **6.12** ॥

त्वद्दाने जनकेन मैथिलि पुरा शुल्कीकृतं स्वामिनः
पाण्यङ्गुष्ठकिणं व्यधात् पशुपतेश्चापे गुणारोपणम्।
त्वत्संप्राप्ति सहायवानरपतेः प्रत्यायनार्थं त्वभूत्
पादाङ्गुष्ठकिणाय दुन्दुभितनोस्तद् दूरतः क्षेपणम्॥ **6.13** ॥

निशिचरपतिमन्तं नेष्यता तद्गृहीतां
पुनरवनिसुते त्वां प्राप्स्यता राघवेण।
तरणिजमभिराद्धुं तत्र कार्ये सहायं
सपदि निरपराधः सादितो हन्त वाली॥ **6.14** ॥

परोरजसि धामनि श्रुतिशिरोभुवि च्छान्दसे
महामहसि योगिनां दहरमन्दिरे च स्थितः।
धरादुहितरादरात् तव कृते कपीन्द्रागतिम्
प्रतीक्ष्य दिवसान् बहूनवसदृश्यमूके प्रभुः॥ **6.15** ॥

रघुकुलपतिना ते लोकनायैव सीते
कृतरविसुतसेवः कोऽपि दत्तानुभावः।
वनशिखरिविहारी वानरब्रह्मचारी
जलधिमपि ललङ्घेऽजात खेदं ललन् खे॥ **6.16** ॥

द्रष्टुं त्वां ननु हनुमन्तमग्निदाहा -
द्यातङ्कं बहुमधिलङ्कमाप्तवन्तम्।
सर्वस्वायितपरिरम्भसौख्यदानात्
काकुत्स्थो जननि चकार निर्व्रणं तम्॥ **6.17** ॥

दरादुपनतं रमे दशशिरोऽनुजं त्वत्कृते
    समस्तनयकोविदः सपदि सङ्ग्रहीतुं प्रभुः।
असाधितरिपुस्थलोऽप्यभिषिषेच तं तत्पदे
    नरः कुशलमश्नुते न खलु साहसिक्यादृते॥ **6.18** ॥

स्त्रीहेतोः प्रथमं निजेन गुरुणा व्युत्पादितं ज्यायसः
    साम्राज्यानुभवे भवेदनुज इत्येतत् विगीतक्रमम्।
सुग्रीवे च विभीषणे च भगवानाम्रेडयामास तं
    भूमेः पुत्रि भवत्कृते पितृगुणः पुत्रे हि धत्ते पदम्॥ **6.19** ॥

देवि त्वदर्थे दयितं नदीनां
    सतां शरण्यः शरणं स गच्छन्।
कुशेशयाक्षोऽपि कुशेशयत्वं
    प्राप त्वदावासपदाशयेव॥ **6.20** ॥

प्रत्यानेतुमुपागताय भवतीमासन्नलङ्कोषितां
    वात्सल्यादिव ते विभागचकितो वारां निधिस्त्वद्गुरुः।
काकुत्स्थाय चिराय मार्गमदिशत् कालाग्निनेवामुना
    शोणाक्षेण रुषा शुशोषयिषितः सीते शितैः सायकैः॥ **6.21** ॥

प्रपात्य महतो गिरीन् प्रसभमन्तरिन्द्रेण यो -
    ऽप्यधायि वसुधासुते तदनुजस्त्वदर्थं प्रभुः।
अमुं बहिरिलाधरैरपि दधन्निधिं पाथसां
    कपिव्रजकरार्पितैः किमिह शेषपूर्तिं व्यधात्॥ **6.22** ॥

अङ्घ्र्योरक्ष्णोरपि किल फलं वानराणां नराणाम्
    आराद्राशिं तरितुमनसामम्भसामंहसां च।
मानार्हस्त्वामहित भवनाद्मानिनीमानिनीषुः
    काकुत्स्थोऽसौ जननि विदधे कौतुकात् सेतुकार्यम्॥ **6.23** ॥

अन्तर्यः स्फुटमनलेन वारितोऽभूत्
विश्वेषां जननि विधातुमेष सेतुम्।
त्वल्लिप्साकुलरघुनाथचोदनातः
पाथोधिर्बहिरपि वारितो नलेन ॥ **6.24** ॥

सेतुं देवि भवत्कृते रघुपतिः सृष्ट्वा जनांश्चापुनात्
एतेषां सगरान्ववायजनुषामेष स्वभावो ध्रुवम्।
स्वर्गादेव भगीरथः पितृकृते भर्गाच्च रोषाविलात्
आनीतैरपुनीत लोकमखिलं गाङ्गैस्तरङ्गैः कृती ॥ **6.25** ॥

प्रभोरलङ्घ्योपनिरोधमम्ब
कृतेऽपराधेऽपि करिष्यसीति।
लङ्कोपरोधं रघुवीरदासा
हन्त त्वदर्थं हरयो वितेनुः ॥ **6.26** ॥

प्रीतिं निनीषुः प्रियदेवतां त्वां
समुद्रतीरेऽभिचरन् स रामः।
महाहवं मैथिलि वर्धयिष्यन्
अयोमुखेन व्यलुनात् पलाशान् ॥ **6.27** ॥

त्वल्लिप्सयैव धर्मे -
ष्वासक्तो विप्रयोगिवद्व्यसनी।
काञ्चन दानसमृद्धिं
भुवि वरदे विप्रहस्तमनयदिनः ॥ **6.28** ॥

सदस्युदारेऽप्यतिकायमान
महालये सत्यभितो रणाग्रे।
जयश्रिया हन्त बलाद्वृतोऽपि
त्वय्येव विन्यस्तमनाः स नाथः ॥ **6.29** ॥

विष्णुः स्वयं त्वद्विरहासहिष्णुः
अपांसुले हंसकुलावतंसः।
तपस्वरूपस्य कृतप्रभेदं
निनिन्द भूनन्दिनि मेघनादम् ॥ **6.30** ॥

उच्चैरावणपुष्टः
कुम्भस्तव देवि कुम्भिनीतनये।
सद्यस्स्तनवैरीति
क्रोधादेनं जघान रघुनाथः ॥ **6.31** ॥

लोकव्रातालम्भकं कुम्भकर्णं
लुम्पन्नम्ब त्वत्कृते रामचन्द्रः।
अर्थादेष त्वज्जनन्या धरण्या
भूरिं भारं देवि दूरीचकार ॥ **6.32** ॥

निर्णीय भूयस्तरपुण्यलभ्यं
रामः क्षमापुत्रि समागमं ते।
नीत्वाऽऽहवं पुण्यजनाननेकान्
अकारयत् स्वर्वनिताविवाहम् ॥ **6.33** ॥

धर्मं हि पूर्वमवलम्ब्य कृते जनन्याः
कालं निनाय कुतुकादधिकाननं यः।
देवि त्वदर्थमवलम्ब्य तमेव रामः
कालं निनाय कुतुकादधिकाननं सः ॥ **6.34** ॥

पापपञ्चकनिरासहेतुना
सेतुना तव कृते महीसुते।
एत्य पापदशकं विनाशयन्
ईशिता चतुरतामदर्शयत् ॥ **6.35** ॥

परमार्थयितुं हुताशनात्
    श्रियमिच्छेदिति साधुभाषितम्।
भवतीं श्रियमम्ब पावकात्
    जगृहे जानकि लक्ष्मणाग्रजः॥ **6.36** ॥

प्राणव्ययं कृतवतः प्लवगांस्त्वदर्थे
    भूयोऽपि जानकि जिजीवयिषुः स रामः।
वव्रे वरं त्रिजगतां वरदोऽपि देवान्
    कार्यार्थिनो हि पुरुषस्य कुतोऽवलेपः॥ **6.37** ॥

काकुत्स्थः कमनीयभूषणमणिक्षौमाग्र्यहेमादिभिः
    तोषं देवि निनाय वानरभटांस्त्वत्कार्यधुर्यान् प्रभुः।
एतद् युक्तमिदं तु विस्मयकरं यत् सर्वनिर्वाहिणे
    रङ्गं हन्त विभीषणाय दिदिशे रत्नादियोग्याय सः॥ **6.38** ॥

अवतारान् दश भगवान्
    अपत्यभूतं जगत् समस्तं ते।
त्रातुं मातरकार्षीत्
    त्वदिष्टकरणादृते न तस्य फलम्॥ **6.39** ॥

॥ इति श्रीमद्वेङ्कटाध्वरिविरचिते श्रीलक्ष्मीसहस्रे यत्नस्तबकः षष्ठः॥